विराटनगरे चतुःखखद्वि२००४मिते वैक्रमाब्दे प्रवर्तित आवेशनशालासु कर्मकराणामुपद्रवे तत्प्रवर्तकाः कोइरालादय आहतलक्षणा अभवन् । तेष्वेवाहतलक्षणेषु कश्चन मदनमोहनाधिकारी* कोइरालादिभिरात्मसात्कृतेषु बहुषूच्चपदेषु

* अस्य वास्तवं नाम मनमोहनाधिकारी । — सम्पादकौ

CC-0. Nepal Sanskrit Academy, Kathmandu

तत्रैव विराटनगरे पुनरपि तादृशमेवोपद्रवं प्रवर्तयामास । लव्धप्रभुशक्तेः श्रीविश्वेश्वरकोइरालाकस्यादेशेन तदनुजो विराटनगरपालस्तं मदनमोहनं ससहायं कारागृहातिथितां निनाय । पुनः कोइरालादलपरिपन्थिभिः प्रवर्तितेन कोलाहलेन लोकक्षोभो मा भूदिति वुद्ध्या कारागृहे धृतानशनव्रतं ससहायं तं मदनमोहनं कोइरालानुजो मुमोच । पुनः स्वानुयायिभिर्वेष्टितो मदनमोहनः कोइरालाकृतं विधिं सर्वमपि दूरीकृत्यावेशनशालासु स्वमेव विधिं निधापयितुमुत्सुकतां भेजे । तदसहिष्णुः कोइरालाश्चावेशनशालाभवेषु कर्मकरेषु नगरे कोलाहलं वितन्वत्सु गुटिकाप्रहारेण नव जनान् घातयामास । एकपञ्चाशतं जनांश्च क्षताङ्गान् कारयामासेति नगरे महान् कोलाहलो वर्तते ।

२००८।१।५।४

मात्सर्यलोभाकुलचेतसां हि मिथ्या प्रतिज्ञामपि सत्प्रमाणम् ।
मत्वा चरन्तो हतशेमुषीका जना अहो दुर्गतिमाश्रयन्ते ॥

अद्यः प्रातः श्रीमोहनशमशेरः सिंहप्रासादं विहाय स्वकीयमावासं लक्ष्मीनिवासमगमत् । यः प्रधानमन्त्रित्वमुपैति स एव सिंहप्रासादमधिवसत्विति नियमः श्रीचन्द्रशमशेरेण निबबन्धे । तन्नियमानुगत्या च श्रीभीमशमशेरः श्रीजुद्धशमशेरश्च सिंहप्रासादवास्तव्यतामध्यगच्छताम् । श्रीपद्मशमशेरस्तु स्वां कृपणतां लोकहितवृत्तित्वेन निगूहितुकामः स्वां सामान्यां जीवनचर्यां प्रदर्श्य लोकप्रियत्वमैच्छत् । अत एव प्रचुराणि गृहोपकरणवस्तून्यक्रीत्वा कोषे धनं सञ्चेतुकामः स तस्मिन् महति प्रासादे वासं नैच्छत् । एवं स विशालनगर एव स्थितिमरचयत् । श्रीमोहनस्तु पित्रोपार्जितेन प्रचुरेण धनेन संप्राप्तमदः स्वं प्रभावं प्रदर्श्य सर्वा अपि प्रजा दासकोटयां निधापयितुमेकान्ततोऽभ्यलषत् । अत एव श्रीपद्मे भारताय प्रस्थित एवानधिगतप्रधानमन्त्रिपदोऽपि स झटिति सिंहप्रासादे स्वस्थितिमरचयत् । परन्तु जगति नानावादैराकुलिते धूर्तैः प्रवर्तिते च विविधे कोलाहले दारिद्र्योपहतासु प्रजासु विमूढीभूतासु श्रीमहाराजाधिराजस्य भारतगमनेन नेतृब्रुवैः प्रवर्तितेन युद्धेन भारतीयषाड्गुण्येन च हतशक्तिः श्रीमोहनः स्वं गौरवं द्रढयितुं प्रभुतां नाप्नोत् । एवं हतप्रभुताधिकारः शिष्टसामान्यशक्तिः श्रीमोहनः सिंहप्रासादमत्याक्षीत् । सिंहप्रासादे च दशानामपि मन्त्रिणामधिकरणानि कृतपदानि भवन्तीति श्रूयते ।

२००८।१।७।६

स्वं जीवितं स्वं धनमेव रक्षंस्तेजस्वितां स्वामनवेक्षमाणः ।
राणान्वयोऽल्पैर्दिवसैः समस्तं प्राचीनसिद्धान्तमपाचकार ॥

राणान्वयो नश्यतु नाम तेन हानिश्च का स्यान्मम नीवृतोऽस्य ।
परन्तु नेतृब्रुवपीडचमानां भुवं समालोक्य कथं सुखी स्याम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

प्राचीनर्सिद्धान्तमपाकरिष्णुर्नवीनविद्याविषयं न बोद्धा ।
नेतृब्रुवो मर्त्यगणः समन्ताद्ध्वांसत्वमेवं तनुतेऽत्र देशे ॥

राणाकुलस्य निजगेहजनैर्विरोधे नेतृब्रुवैः शठजनैः परितः प्रवृद्धे ।
भूपस्य वाह्यगमनात् स्फुटतां प्रयाते नीत्या हि भारतजया फलवत्त्वमाप्ते ॥

दुर्वादर्वाञ्चितहृदामनबोधभाजामाकस्मिकं सुखचयं लषतां जनानाम् ।
नानाविधेन कटुना करणेन भूयान् मर्त्यव्रजः क्षयमथ व्ययितां जगाम ॥

अराजकत्वं जननाशकारकं शनैः शनैर्लब्धपदं विलोक्यते ।
नेतृब्रुवाणां चरितं च मानवैः शनैः शनैर्दृष्टिपथे विधीयते ॥

नेतृब्रुवाः समवलम्ब्य बलं यदीयं नेपालशासकपदं महनीयमापुः ।
तानात्मनः सहचरांस्तरसा निहन्तुं सङ्कोचवत्त्वमपि नैवमहो व्रजन्ति ॥

स्वीकृत्य भारतकृतां निजदेशपीडां स्वाधीनतामपि च संशयितां विधाय ।
सैन्यैर्हि भारतभवैर्निजपूर्वसख्यमाप्ताञ्जनान् पुनरिमे बत घातयन्ति ॥

निदर्शनं दृष्टमहो बुटौले नेपालगञ्जेऽप्यथ मोरङे च ।
पाश्चात्त्यदुर्नीतिविषप्रसारान्नेपालभूः क्षीणतनुत्वमेति ॥

२००८।११।३।५

सप्तखाम्बरचक्षुर्भिः २००७ संमिते वैक्रमाब्दके ।
राणाकुलजदोषेणाऽन्योन्यसंघर्षहेतुना ॥

नृपतेश्च स्वमुक्तत्वं काङ्क्षतश्चरितेन च ।
भारतस्यापि राणानामपकर्षमभीप्सतः ॥

नयेन, बहुलानां हि प्रजानां च जिघत्सया ।
नेतृब्रुवा जनपदे बहवः स्थ्रितिमाययुः ॥

प्रजातन्त्रप्रवादेन साम्यवादाश्रयेण हि ।
पठितम्मन्यतामाप्ताः प्रमोदं लेभिरे बहुम् ॥

असत्यैरर्धसत्यैश्च कथनैर्नायकेरितैः ।
राणाद्वेषं प्रजाचित्ते स्थापयामासुरेव ते ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

राजभक्त्या व्याप्तचित्ता राजनीतेः पराङ्मुखाः ।
जनास्तु नृपभक्त्यैव राणाद्वेषमुपाययुः ॥

एवं प्रजाद्रोहवह्निर्नेपालविषये ज्वलन् ।
राणाश्रयं यशःस्तम्भं भस्मसादकरोत् क्षणात् ॥

इतस्ततः प्रधावन्तो भाषमाणाः वहूः कथाः ।
नेतृब्रुवाः धनं कीर्तिमात्मसात्कर्तुमुद्यताः ॥

राणानामिव तेषां च मिथः स्पर्धासमुद्भवः ।
कलहो वर्धमानः सन् प्रजानां गोचरोऽभवत् ॥

दीनाः प्रजा अपीड्यन्त शरीरायासमाश्रयन् ।
धनिनोऽपि द्रव्यनाशाच्चिन्ताग्रस्तत्वमागमन् ॥

एवं राणाश्रया शक्तिस्तेषां हस्तात्परिच्युता ।
नृपं नेतृब्रुवान् राणानाश्रयांस्त्रीन् समाश्रिता ॥

न नृपो न च राणा वा न वा नेतृब्रुवा मृताः ।
प्रजाद्रोहः प्रजानाशे ह्याश्रयाश इवाभवत् ॥

एवं पाश्चात्त्यदुर्नीती राणाकृतपदा शनैः ।
प्रजातन्त्रापदेशेन नेपालेऽलभत स्थितिम् ॥

२००८।४।११।५

लालाटिक्त्वमाप्तानां तेजोहीनं मनो भवेत् ।
निस्तेजोमनसो मर्त्या गौरवं स्वं न चक्षते ॥

यथाकथञ्चिद्दासत्वमनुभूयापि जीवनम् ।
सविलासं यापयितुमिच्छन्त्येते जनाः सदा ॥

एतेषां हृदये भक्तिः स्वप्रभुविषया पदम् ।
लभते नैव, ते भक्ता भासन्ते बाह्यभावतः ॥

स्वामिनोऽपि चलां किञ्चिद्विभुतां वीक्ष्य ते जनाः ।
स्वप्रभोश्च रिपुं भक्त्या सेवन्ते हृष्टमानसाः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

एवमस्माभिः शास्त्रेषु बहुधा पठिताः कथाः ।
राणाकुलनिपातोऽयं प्रत्यक्षा व्यदधात्पुनः ॥

राणानां सेवका ये तत्स्तुतिपाठकतामिताः ।
तद्द्वारपूजनपरा भक्त्यावनतकन्धराः ॥

आसन् जना अहो तेषामधुना सैव पद्धतिः ।
कोइरालागृहे स्वीयमावासं तनुतेतराम् ॥

२००८।४।१२।६

वर्तमानो गृहमन्त्री विश्वेश्वरकोइरालाः पुरा वेदखखद्वि २००४ मिते वैक्रमाब्दे विराटनगरे शणश्रेणीकार्यालये कर्मकराणां व्रातीनानां 'वयमेतावता लघीयसा वेतनेन नैव जीवनोपयुक्तं साधनं लभामहेऽतोऽस्माकं वृत्तिर्वर्धनीया' इति सहठं कार्यं रुरुत्सूनां सखित्वं नेतृत्वं चागृह्णात् । तस्मिन्नेवापराधेन स राजकीयादेशेन वन्दिग्राहमगृह्यत च ।

ऐषमोऽष्टखखद्वि २००८ मिते वैक्रमाब्दे प्रजातन्त्रापदेशेन गृहमन्त्रिपदमलङ्कुर्वति विश्वेश्वरे नेपाले राजकीयेष्वधिकरणेषु कर्मकरा लिपिकराः 'वयमेतावता लघीयसा वेतनेन नैव जीवनोपयुक्तं साधनं लभामहेऽतोऽस्माकं वृत्तिर्वर्धनीया' इति गृहमन्त्रिणं विश्वेश्वरं निवेदं निवेदमपूर्णकामा संघर्षायोद्यता अभवन् । तेषां संघर्षश्च किमाकारः कुत्रत्यः कथङ्कारं च भवितेति नैव स्फुटं निर्णीतमस्ति । तेषां भविष्यतः संघर्षस्य कथां श्रुत्वैव विश्वेश्वरो महोदयः 'यः कोऽपि राजकीयः कर्मकरः कार्यं रुरुत्सति वा नगरे सामवायिकतामुपेत्योच्चैराक्रुश्य विरुरुत्सति स नूनं स्वकीयात्पदात्पृथग् भवेत्' इत्यादेशमद्य प्राचीचरत् । एतद् दृष्ट्वा नासावधिकारमीप्सुर्वेदखखद्वि २००४ मिते वैक्रमाब्दे कार्यं रुरुत्सूनां व्रातीनानां नायको विश्वेश्वरोऽत्र वर्तते । किन्तु स्वहस्तगतमधिकारं रिरक्षिषू राणानां हस्तादधिकारं ग्रहीताऽष्टखखद्वि२००८मितवैक्रमाब्दे गृहमन्त्रिपदमलङ्कुर्वन् विश्वेश्वरः कान्तिपुरमध्यास्त इति मे प्रतिभाति ।

दरिद्राणां सख्यं लषति मनुजो दीनविभवः
स तेन व्याजेन प्रथितमपि स्वं नाम कुरुते ।
करे काञ्चित् स्वल्पामपि च विभुतां प्राप्य स जनो
मदेनोन्मत्तः स्वां स्मरति नहि पूर्वां गिरमपि ॥

२००८।४।१३।७

अधुनाऽस्माकं देशे राजनीतिः प्रवेशमलभत । राणानां शासनकाले सर्वेषामधिकाराणामेकस्थतया सर्वेऽपि जनाः शक्तिवैकल्यनम्रा आसन् । तेषां च राजनीतिः सर्वात्मना राणाशासकस्य मनोविनोदात्मिकैवासीत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

वस्तुतस्तु दासमनोवृत्त्यनुकूला सा पद्धतिस्तै राजनीतिरिति परिगृहीता वभूवेति मे मनीषा। कविः कालिदास एतादृशीमेव पद्धतिं तारकासुरप्रसङ्गे वर्णयामास च, यथा

पुरे तावन्तमेवास्य तनोति रविरातपम्।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥ ३३ ॥

सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते।
नादत्ते केवलां लेखां हरचूडामणीकृताम् ॥ ३४ ॥

व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात्।
न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम् ॥ ३५ ॥

पर्यायसेवामुत्सृज्य पुष्पसंभारतत्पराः।
उद्यानपालसामान्यमृतवस्तमुपासते ॥ ३६ ॥

तस्योपायनयोग्यानि रत्नानि सरितां पतिः।
कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते ॥ ३७ ॥

ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते ॥ ३८ ॥

तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः।
अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः ॥३९॥

कुमारसंभवे द्वितीयसर्गे

अधुना शक्तेरनेकस्थतया राणामण्डलस्य कांग्रेसमण्डलस्य परस्परस्पर्धितया च शनैः शनैर्देशे षाड्गुण्यं पदं लभते। एतावता प्रजा सुखिनी भवितेति न ममाभिप्रायः। किन्तु षाड्गुण्योदाहरणानि प्राचुर्यं भजन्त इत्येव मे वक्तव्यम्।

२००८।४।१४।१

मूर्खो जनो निजहितं निजचक्षुषैव द्रष्टुं न याति विभुतामिति किं विचित्रम्।
अन्यैः प्रदर्शितमथो पुरतः स्थितं स स्पष्टं पदार्थमपि नैव हि बोद्धुमीष्टे ॥

२००८।४।१५।२

CC-0. Nepal Sanskrit Academy, Kathmandu

स्थानिवदादेशोऽनल्विधौ (पाणिनिः १।१।५६)

अधुना नेपाले प्रजातन्त्रापदेशेन सुवर्णशमशेरका विश्वेश्वरादयः स्वैरं समाचरन्तो दृश्यन्ते। दोषगुणकथा विवेक्तुमसमर्थो लोकः केवलं कोलाहलं श्रावं श्रावमतथ्यमपि वस्तु तथ्यं मन्यते। प्रजातन्त्रशासने वर्तमाना दोषगुणकथा अपि नेपालवास्तव्यो जनोऽबोधहतत्वान्नैव विचारयति स्म। केवलमन्धपरम्परान्यायेन तस्मिन् सति वयमपि प्रधानमन्त्रिपदं लभेमहीत्येव चिन्ता लोकमनसि कृतास्पदाऽसीत्। अत एव राणानामेकाधिकारं वीक्ष्य सर्वतो रुद्धगतिमात्मानं मन्यमानो लोकस्तेषां राणानां विनाशाय नेतृब्रुवैः प्रतिपादितया रीत्या भृशमयतिष्ट। स्वदेशव्यवस्थां परदेशव्यवस्थां च परीक्ष्य तयोः साधीयस्या ग्रहणाय नैव प्रावर्तत नेपालवास्तव्यो जनः। अथवा किंवा करोतु वराको लोकः। यतो राणानां शासने पञ्चतन्त्रादिकानां कथात्मकानां नीतिवाक्यानामपि लेखादिकं देवंमन्येभ्यो राणाशासकेभ्यो नैव रोचते स्म। यतो राणानां वन्दिना लेखनाथकविना भाषायां निबद्धं पञ्चतन्त्रमपि चन्द्रशमशेरभीमशमशेरादीनां कुदृष्टिभाजनमासीत्। इतिहासान्निःसृता दोषगुणपरीक्षैव राजनीतिपथस्यालोकस्तम्भायते। राणाशासकानां दृष्टावितिहासरसिका राजद्रोहाभियोगार्हा भवन्ति स्म। लब्धप्रशमनाय सञ्चरतां पाश्चात्त्यानां नीत्या विवशतामनुभूयाऽस्माकं शासका यथाकथञ्चित् तेषां सत्काराय स्वविषयजमितिहाससाधनं रक्षयन्ति स्म नाम। परं किञ्चिदपि स्वजनपदजमितिहासं विवक्तुकामः पुरुषो राणानां कण्टकायते स्म। अत्र निदर्शनमितिहासरसिको बाबुराम एव वर्तते। यतः स राणानां लालाटिकत्वं स्वीकृत्यापि कियत्यापि स्वतन्त्रया प्रतिभया सञ्चरितुकामः सर्वतो रुद्धगतिरेवासीद् राणानां विनिपातात्पूर्वम्। एवं सर्वतोऽन्धतमसं समेध्य भूपतिं प्रजाश्चानवबोधकूपे निपात्य राजकीयात् कोषात्प्रचुरं धनं प्रसभं गृहीत्वा सविलासहासं समयाकरणमेवादर्शायते स्म राणाशासकानाम्।

राणाशासकानां दुर्नीतिपादपे फलवति कोइरालाशासकानां भोजनोत्सवः समजायत। प्रजातन्त्रापदेशेन लोकानां चक्षुषी रजसा पूरयित्वा स्वाभीष्टं साधयन्ति कोइरालाशासकाः। अबोधहतो जनो न पुनर्जानीते राज्य-व्यवस्थाम्। अतः कोइरालाशासका यद् यदिच्छन्ति तत्तदेव प्रजातन्त्रव्यवस्थालङ्कृतं भवति। अत्र च पूर्वेषां राणाशासकानामवमानना मुख्यतां बिभर्ति। विद्वन्मन्याः केचन राणाशासकानुचराश्च भयात् सभासु तूष्णींभूयाऽपि रहसि कोइरालाशासकान्निन्दन्ति। पूर्वं त एव राणानुचरा एकतन्त्रव्यवस्थाया वन्दितामुपगम्य प्रजातन्त्र-व्यवस्थाप्येतादृशी हि स्यादित्युच्चैराघोषयन्ति स्म। इदानीं च त एव जनाः कोइरालाशासने प्रजातन्त्रदृष्ट्या दोषमुत्पादयितुमेकतन्त्रशासनस्य च दोषं कथयितुं दृढवद्धपरिकरा लक्ष्यन्ते। एतादृशैर्जनैरिदं स्मर्तव्यं भवति – आदेशः शत्रुवद्भवति स चादेशो यस्य स्थाने जायते तस्मिन् स्थानिनि वर्तमानान् धर्मान् गृह्णातीति।

स्थानिवदादेशोऽनल्विधौ (पाणिनिः १।१।५६)

केवलमल्विधिं नाम प्रतिवर्णं विद्यमानं भिद्यमानमसाधारणं धर्मं विहाय सर्वानन्यान् धर्मानादेशः स्थानिनो भजते।

CC-0. Nepal Sanskrit Academy, Kathmandu

एवमेवात्रापि राणाशासका अपि प्रासादेषु वसन्ति स्म । कोइरालाशासका अपि प्रासादेष्वेव रमन्ते । राणाशासकेभ्यश्चाटुकारिता रोचते स्म । कोइरालाशासकेभ्योऽपि सा रोचते । राणाशासका गुणापेक्षाशून्यतामिव गत्वा स्वसम्बन्धान्वितमेव राजकीयपदेषु वरणार्हतां नयन्ति स्म । एतदेव कोइरालाशासका अनुकुर्वन्ति । परं राणाशासकानां प्रतिव्यक्ति भिद्यमान आकारादिकोऽसाधारण धर्म एव कोइरालाशासकेभ्यो भिद्यत इति ।

२००८।४।१८

अधुना श्रीमहाराजाधिराजस्य प्रासादे प्राय उत्सवो भवति । तस्मिंश्चोत्सवे मन्त्रिणस्तथाऽन्ये च ख्यातयशसोऽतिथयः सपत्नीकाः समवयन्ति । तत्र च समधुपानं भोजनं विधाय नृत्यन्ति द्वन्द्वीभूय जनाः । तस्मिंश्च द्वन्द्वे गम्यागम्यविचारो न भवति । यः कोऽपि नर्तकः स्वाभिमतया नर्तक्या साकं स्वैरं नर्तितुं प्रभवति । भूयांसो राणाकुलीना सहर्षञ्चास्मिन्नुत्सवे सामवायिकतां बिभ्रति । श्रीमहाराजाधिराजस्य प्रासादे प्रवेशं लभमानाः श्रीमन्तः स्वीये हर्म्येऽपि तादृशमुत्सवं प्रवर्तयितुं कृतोद्योगाः श्रूयन्ते । कतिपयैर्दिवसैर्वारवनितासुलभा विलासाः सतीधर्मं गलहस्तयेयुरिति केचन चिन्तयेयुः । परं नैतत्संभवितेति मे मतिः यतोऽस्माकं महाराजाधिराज एव स्वैरं विहरतीति न चिन्तनीयम् । सर्वेऽपि सुखलब्धधना एतादृशा एव प्रायो भवन्तीति न विस्मरणीयम् । प्राचीनेषु नाटकेषु काव्येष्वाख्यायिकासु चैतादृश्यः कथा भूयस्यो लभ्यन्ते । कविः कालिदासोऽपि *रघुवंश*स्योनविंशे सर्गेऽग्निवर्णस्य प्रसङ्ग एतादृशीमेव स्थितिं वर्णयामास । तस्माच्च कतिचन श्लोका अत्रोद्ध्रियन्ते ।

लब्धपालनविधौ न तत्सुतः खेदमाप गुरुणा हि मेदिनी ।
भोक्तुमेव भुजनिर्जितद्विषा न प्रसाधयितुमस्य कल्पिता ॥३॥

कामिनीसहचरस्य कामिनस्तस्य वेश्मसु मृदङ्गनादिषु ।
ऋद्धिमन्तमधिकर्द्धिरुत्तरः पूर्वमुत्सवमपोहदुत्सवः ॥५॥

सातिरेकमदकारणं रहस्तेन दत्तमभिलेषुरङ्गनाः ।
ताभिरप्युपहृतं मुखासवं सोऽपिबद्बकुलतुल्यदोहदः ॥१२॥

स स्वयं प्रहतपुष्करः कृती लोलमाल्यवलयो हरन्मनः ।
नर्तकीरभिनयातिलङ्घिनीः पार्श्ववर्तिषु गुरुष्वलज्जयत् ॥१४॥

चारु नृत्यविगमे च तन्मुखं स्वेदभिन्नतिलकं परिश्रमात् ।
प्रेमदत्तवदनानिलः पिबन्नत्यजीवदमरालकेश्वरौ ॥१५॥

नूनं शास्त्रेषु विश्वासभाजो जना नृपस्यैतादृशं चरित्रं दृष्ट्वा संभ्रान्तान्तःकरणा भवेयुः । बुभुक्षाकुला बलिभिः पीड्यमाना दीनाः प्रजाश्चैतादृशं नृपं मनसा शपेरन् । परं ज्ञातधनिजीवनचरित्रो जनो विस्मयं नादधीतात्र ।

यदि वा शास्त्रोक्तेन पथा (यथादर्शितमाचार्येण कौटल्येन–

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः प्रजानां च प्रियं हितम् ॥)

सञ्चरेत राजा तदा न क्वापि लोकव्यवस्था मालिन्यमुपेयान्न वा राष्ट्रविप्लवेन राजवंशानां विपर्ययो नवा नवाः शासनव्यवस्था वा पदं भजेरन् । परमिन्द्रियवशवर्तिता नैतदनुमन्यते ।

२००८।४।१९

वर्तमानस्य खाद्यमन्त्रिणः सूर्यप्रसादस्यादेशेन वा गृहमन्त्रिणो नियोगेन वा साम्प्रतं राणावंश्यानां बहादुर-शमशेराग्निशमशेरहरिशमशेरनारायणशमशेरशङ्करशमशेरैकराजशमशेरयुवराजशमशेरसमरशमशेरकाणां तथा रत्नलालादीनां वणिजां तथाऽन्येषां च गेहेष्वन्नराशिः सञ्चितो वर्तत इति धिया राजकीयाः पुरुषा विचयं कुर्वते । अग्निशमशेरस्य गृहे विचये व्रीहेः खारिकाणां षट्शती समलभ्यत, समरशमशेरस्य गृहे च व्रीहेः खारिकाणामष्टशती समुपालभ्यतेति च राजकीयो घोषः । महत्तमो धान्यराशिश्च समरशमशेरस्य गृहे समुपलब्ध इति च राजकीयो घोषः ।

अत्रेदं चिन्त्यते । एकः पुरुषः सायं प्रातश्चेति दिवसस्य द्विर्भुङ्क्ते । सकृच्च स एकमानिकापरिमितेन तण्डुलेन समुत्पादितमोदनं च खादति । एवमेकस्य पुरुषस्य दैनन्दिने भोजने द्विमानिकामितं तण्डुलं पर्याप्तं भवति । एकस्मिन् वत्सरे च पञ्चषट्त्रिमितानि दिनानीति ३६५ x २ = ७३० वर्ष एकस्य मनुष्यस्य भोक्तव्यास्तण्डुलमानिकाः ।

२० x ८ = १६० एकस्यां खारिकायां मानिकाः ।

$\frac{७३०}{१६०} = \frac{७३}{१६}$ वर्ष एकस्य पुरुषस्य भोक्तव्यास्तण्डुलखारिकाः ।

पञ्चानां धान्यमानिकानां द्वे तण्डुलमानिके समुत्पद्येते इति सामान्यो नियमः ।

अतः

$\frac{७३}{१६} \times \frac{५}{२} = \frac{३६५}{३२} = ११\frac{१३}{३२} = ११\frac{१}{२}$ स्वल्पान्तरात्वात् ।

एवमेकस्य पुरुषस्य कृते वर्षे $११\frac{१}{२}$ धान्यखारिकाः सञ्चेया भवन्ति ।

यस्य पुरुषस्य पञ्चाशज्जनात्मकः परिवारो भवति तस्य कृते $११\frac{१}{२} \times ५० = ५५० + २५ = ५७५$ खारिकापरिमितो धान्यराशिरेकस्मिन् वर्षे पर्याप्तो भवति केवलाया अभ्यवहृतये । मनुष्याः प्रातरागतेभ्योऽतिथि-

CC-0. Nepal Sanskrit Academy, Kathmandu

रूपेभ्यो भिक्षुकेभ्यो दानं पारावतादीनां पक्षिणां कृते कियतीनां तण्डुलमुष्टीनां विकरणं गृह्येभ्यः पशुभ्यः पक्षिभ्यश्च भोजनं तथा श्राद्धादिषूत्सवेषु स्वेषामभीष्टानां जनानां भोजनं च कुर्वन्ति कारयन्ति चेति प्रत्यक्षमेव । एवं स्थिते नेपाले प्रधानशासकवंश्यानामुच्चेषु पदेषु कृताधिरोहाणां प्रचुरैः किंकरैश्चेटीभिश्च सेव्यमानानां गृहपालितबहुविधजीवानां प्रचुरगृहजनानां पुरुषाणां गृहेषु समुपलभ्यमानो महत्तमो खारिकाऽष्टशतीपरिमितो धान्यराशिः कथङ्कारं तेषां धनसञ्चयात्मिकां लुब्धतां दर्शयेदिति न वयं जानीमः । अतः साम्प्रतिकाः शासका राणावंश्यानां तदनुगानां चापमानमेव कर्तव्यं मन्वते वा तदतिरिक्तमपि लौकिकं हितं चिकीर्षन्तीति तु काल एव प्रत्यक्षीकारयेत् ।

२००८।४।२०

मुस्लीमानां रूढिमूलां व्यवस्थां धर्मश्रद्धामन्धभावोपपन्नाम् ।
हिन्दूद्वेषं वर्धयत् सर्वयत्नैः पाकिस्तानं स्वां स्थितिं सन्दधाति ॥

हिन्दूजातिद्वेषभावाश्रयेण लब्धख्याति प्राप्तसत्त्वं च राज्यम् ।
पाकिस्तानं साम्प्रतं भारतेन स्पर्धां कुर्वत् वर्तने नः समक्षम् ॥

नेपालीयान् पीडितान् भारतेन हिन्दून् राणान् स्नेहदृष्टचैव पश्यत् ।
पाकिस्तानं साम्प्रतं मण्डलीययोनेश्चारं पाठयद् वर्ततेऽग्रे ॥

एवं दृष्ट्वा बुद्धिमान् मण्डलानां चारं सम्यग् बोद्धुमीहेत यत्नात् ।
तस्याज्ञानात् कल्पनामात्रसारे वृत्ते धूर्तैश्चालिते कः प्रतीयात् ॥

२००८।४।२२

अष्टखखद्वि २००८ मिते वैक्रमे श्रावणस्य चतुर्विंशे दिवसे हिरण्यशमशेरो दिवमगच्छत् । अयं श्रीभीमशमशेरस्य भोगिन्यामुत्पन्नः पुत्र आसीत् । अस्य जन्म च १९४३ वैक्रमे बभूव । अयं वीरचन्द्रयोः शासनकालेऽनौरसत्वेन प्रधानमन्त्रिपदभाक्षु राणावंश्येषु गणनालेख्यं नाप । १९८६ वैक्रमे दिवं गते श्रीचन्द्रे प्रधानमन्त्रिपदमधितिष्ठति च श्रीभीमेऽयं सानुजः सापत्यः प्रधानमन्त्रिपदभाग् व्यधीयत पित्रा । विवशाश्चन्द्रात्मजा अन्ये च तत्तूष्णीमसहन्त । श्रीवीरस्यानौरसाः पुत्रा रुद्रादयः स्वदलस्य वृद्धया प्रमोदमभजन्त । एवमप्रज्ञप्तो नियमो राणाकुलस्य दुर्विपाकेन प्राज्ञप्यत ।

तदनु च विवृद्धायामौरसानौरसदलजायां राणाकुले परस्परस्पर्धायां १९८९ वैक्रमेऽब्दे दिवं प्रयाते श्रीभीमे नवे प्रधानमन्त्रिणि श्रीजुद्धे चौरसदलपक्षपातिनि बलवत्त्वमापुश्चन्द्रात्मजाः । १९९० वैक्रमाब्दे चैत्रे भूकम्पमनु श्रीजुद्धेन सर्वेऽप्यनौरसा राणावंश्या हृतप्रधानमन्त्रिपदाधिकारा अक्रियन्त । विभिन्नेषु स्थलेषु ते देशरक्षक-तयाऽस्थाप्यन्त च । अयं हिरण्यः पूर्वं पौरस्त्यविभागे कृतपदः पश्चाद्वीरगञ्जे लब्धाधिकारोऽभवत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

२००२ विक्रमाब्दे राज्याधिकारं त्यक्तवति श्रीजुद्धे प्रधानमन्त्रिपदमलङ्कुर्वति च श्रीभीमस्यौरसपुत्रे श्रीपद्मे तदनुजो हिरण्यः पुनरपि नेपाले महनीयं पदं प्राप्तुमयतत । तस्मिन् कर्मणि च तस्य सहायो वर्तमानोऽर्थमन्त्री तदीयः पुत्र एव सुवर्णशमशेर आसीत् ।

इत्थं सुवर्णेन प्रेरितः श्रीपद्मो भारतेंऽग्रेजानामधिकारत्यागमनु नेपालेऽपि राजकीयेषु कार्येषु प्रजानां प्रवेशं साधुममन्यत । तत्फलं च २००४ वैक्रमाब्दस्य नियमो नेपाले प्रावर्त्यत । परं तस्य नियमस्य घोषणमनु चन्द्रात्मजैर्जुद्धात्मजैश्च भृशं पीडितः श्रीपद्मो नेपाले वस्तुमपि नापारयत् । रुदंश्च स नेपालान्निर्गच्छन् सर्वैः प्रत्यक्षीकृत एव ।

भारतं गत्वापि भारतप्रधानमन्त्र्यादिभिः संमिल्य मासद्वयाधिकं कालमयापयत् सः । न तु स्वस्य त्यागपत्रमददात् । ततश्च नेपालस्थै राणावंश्यैर्मोहनादिभिः साम्ना दानेन (वार्षिक्या लक्षत्रयरूप्यात्मिकया वृत्त्या) च प्रयुक्तः सोऽन्ते त्यागपत्रमददात् । तत्फलं च २००५ वैक्रमे श्रीमोहनः प्रधानमन्त्रिपदमभजत ।

श्रीमोहनाय तदनुजेभ्यश्च नारोचत स्वाधिकारहानिर्नाम प्रजाभ्यो दीयमानः कश्चनाधिकारः । अत एव प्रतिज्ञाताऽप्यायव्ययगणना नादर्श्यत । न वा कस्मिंश्चिद्विषये प्रजानां प्रवेश एव व्यधीयत । नूनं पितृप्रहृतेनाध्वना सञ्चरितुकाम आसीच्छ्रीमोहनः ।

तदनु २००६ वैक्रमाब्दे शीततौ भारतं जिगमिषन् श्रीमोहनो भारतस्य दृष्टौ स्वमपि प्रजातन्त्रवादिनं घोषयितुं नाममात्राधिकाराः पाञ्चालिका अस्थापयत् । भारते चायं महनीयेन सत्कारेणापूज्यत । ततः प्रतिनिवृत्तः श्रीमोहनः स्वमवन्दमानानां हिरण्यादीनां धनरोधनमकरोत् । नूनं राणाद्रोहिणि कांग्रेसे हिरण्यादीनां कश्चन सम्बन्ध आसीत् । परं तत्कालपर्यन्तं न वा कांग्रेसे तादृशी शक्तिरेवासीन्न वा हिरण्यादयः प्रत्यक्षं राणाद्रोहमेवाकुर्वन् ।

तदनु च स्फुटमेव राणाद्रोहमकुर्वन् हिरण्यादयः । तदीयः पुत्रः सुवर्णश्च राणाद्रोहिणामग्रणीतामभजत । तदीय एव कोषश्च निर्धनानां कोइरालादीनां महान्तमुपकारमकरोत् । एवमनौरसराणानां कोषेण तेनैव कोषेण सञ्चितेन वलेन च कांग्रेसो राणाद्रोहं सर्वतः प्रासारयत् । यत्फलं च नः प्रत्यक्षमेव ।

२००८।४।२६।६

कोइरालारेग्म्यादयो भारतीयसमाजवादिदलनेतृणां जयप्रकाशलोहियादीनां साहाय्येन भारत आङ्ग्लाना-मधिकारान्मुक्ते नेपालीराष्ट्रियकांग्रेसनाम्नैकां सभां रचयामासुः । सा च सभा राणाद्रोहिणी जन्मत एव वभूव । अतथ्यैरर्धतथ्यैश्च प्रजल्पनैर्लोके राणाद्रोहप्रसारणं सा सभा सर्वतोऽकरोत् । २००४ वैक्रमे विराटनगर आवेशनशालोपद्रवापराधे निगृहीते कोइराले राष्ट्रियकांग्रेसाध्यक्षतामगच्छद्रेग्मी । पुनर्मुक्ते कोइरालेऽध्यक्षतां जिघृक्षति तयोरन्योन्यस्पर्धया वैरबीजं समुदपद्यत ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पुनरनौरसानां राणावंश्यानां साहाय्यमादाय प्रभुतां प्राप्ते कोइराले रेग्मी तदीयाचरणमप्रजातन्त्रात्मकमाघोषयन् नेपाले सुवर्णशमशेरकाणां कोइरालादीनां चक्षुःपीडाकरोऽजायत । परस्परमसत्यैरर्धसत्यैश्च प्रलपनैर्निन्दामाचरत्सु कोइरालाकेषु रेग्मिकेषु च सुवर्णशमशेरकाः कोइरालादयः प्रजादृष्टावुपहास्यतामिव शनैः शनैरयान् । स्वया पश्यतोहरतां वृत्या सविलासं जीवनं यापयन्तो राणावंश्या मोहनादयस्तदीयाः किङ्कराश्च निसर्गादेव सुवर्णशमशेरककोइरालाद्वेषिणि रेग्मिके गणे समुत्पन्ने प्रमोदमभजन् । यतस्तेषां प्रजापीडनेन स्वकोशपूरणं गङ्गदत्तायमानेन सुवर्णशमशेरेणैव व्यहन्यत । रेग्मिको गणः स्वेषु प्रवचनेषु भरतशमशेरकस्य गोरखादलस्य सुवर्णशमशेरकेण नेपालीकांग्रेसदलेन समतां विधाय मोहनादीनां प्रीतिमवर्धयच्च । अनेनैव हेतुना मोहनादयो रेग्मिकं गणं धनेनान्वगृह्णन्निति श्रूयमाणो लोकप्रवादः सत्य एवेति मे मनीषा । अन्यथा दरिद्राणां रेग्म्यादीनां शनैः शनैरुपचीयमानं प्रत्यक्षं सानन्दं जीवनं कथङ्कारमुदियात् ।

एवं प्रवृद्धे जनप्रवादे किमपि जनहितं कर्तुमशक्नुवन्तः स्वयमेव प्रज्वलितं प्रजाद्वेषवह्निं प्रशमयितुमकिञ्चित्करता-मनुभवन्तः प्रजापीडकस्य राणाकुलस्यानौरसेन पुत्रेण गङ्गदत्तायमानेन सुवर्णशमशेरेण पाल्यमानाः कोइरालादयः स्वमधिकारं प्रतिदिनं क्षीयमाणमवलोक्य स्वप्रभोः सुवर्णशमशेरस्य पूर्वजैः परिचालितया पश्यतोहरतां वृत्त्यैव स्वं हितं वीक्षमाणाः स्वानुचरतामिव प्रपन्नं सुखिम(सिक्किम)वास्तव्यं हरिप्रसादप्रधानं प्रधानन्यायाधीशं विधाय करणभूतेन तेन स्वसपत्नगणस्य नाशमैच्छन् ।

हरिप्रसादोऽपि महनीयं वैभवपदं समवाप्य प्रभुहितं विधित्सुः स्वप्रभुद्वेषिणो रेग्मिकान् निग्रहीतुं 'कर्णे तैलं निधाय वसति न्यायाधीशः' इति राष्ट्रियकांग्रेसपत्रे लिखितं वाक्यं न्यायाधिपतेः स्वस्योपरि कृतं वाक्पारुष्यं साधयन् द्वाभ्यां सहायाभ्यामुपेतं रेग्मिणं षड् मासान् कारावासेन रूप्यकाणां पञ्चशत्या दण्डेन च स्वं पूर्वं कर्तव्यजातमदर्शयत् । ततश्च सम्प्रवृद्धे केनचनांशेन प्रजावैराग्ये सिंहप्रासादे जायमानेनोपद्रवेण ताडिते च महाजने तद्व्याजेनाऽप्राप्ताधिकारेषु कोइरालाद्वेषिषु नेपालोपत्यकायाः पुरत्रयेऽप्यापणानां निरोधनेन प्रजाविरोधं वर्धयत्सु मातृनवमीदिने कोइरालाज्ञया गृहीतेषु तथाविधां परिस्थितिं विलोक्य क्षुभितेषु बहुषु जनेषु मोहनायमानः कोइराला दिनद्वयात्पूर्वमेव लब्धराजकीयाज्ञानां सभानां स्थितिर्भवितेति सभाविधातॄन् जनान् निगृह्णन् रिरक्षिषति स्वं पदम् ।

२००८।६।१५

इतः पुरा वर्षशतद्वयीभवो मल्लान्वयः कान्तिपुरीपुरन्दरः ।
जयप्रकाशः परदेशजान् नरानाभ्यन्तरान् संविदधे ह्यशङ्कितः ॥

नृपोऽस्मदीयोऽप्यधुनातनः पुनर्गोविन्दनारायणनामशालिनि ।
बाह्ये जने स्वं सचिवत्वमाक्षिपन् जयप्रकाशानुकृतिं करोति किम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रजाः स्वकीयाः स्वनयेन दुःखिताश्चकार मल्लो नृपतिर्यथा पुरा ।
तथैव शाहान्वयसंभवो नृपो विधास्यतीति प्रतिभाति मे हृदि ॥

२००८।७।१८

बौद्धो धर्मो भारते रूढमूलः शुद्धाचारैः पावयंल्लोकमेतम् ।
आभूपेऽस्मिन् मण्डले मानवीये दीर्घं कालं व्यश्नुते स्म प्रतिष्ठाम् ॥

तस्मिन् धर्मे लोककल्याणमिच्छौ प्रज्ञाभाजां श्रद्धया वर्धमाने ।
धूर्तैः कैश्चित् स्वार्थजीवातुरूपं द्वारं किञ्चित् स्वप्रवेशे व्यधायि ॥

तेषामेव स्वार्थजालोपरुद्धो सोऽयं धर्मो रूपमाप्त्वान्यदेव ।
मुस्लीमानां भारते हस्तमाप्ते तेषामस्त्रैश्छिन्नमूलो बभूव ॥

नेपालेऽस्मिन् धर्मभावोपपन्ने धर्मं लोकः श्रद्धया सेवते स्म ।
अन्योन्येषां स्पर्धमानोऽपि लोको धर्मं दृष्ट्या शुद्धया वीक्षते स्म ॥

तस्माद्धेतोर्धर्ममूलो विरोधो नेपालेऽस्मिन् नाप रूढां प्रतिष्ठाम् ।
शैवा बौद्धा वैष्णवास्तान्त्रिकाश्च स्वानाचारांश्चक्रिरे धर्ममूलान् ॥

अस्मिन् काले बाह्यनीतेः प्रसङ्गाद् धर्मं नीत्या वीक्षते मर्त्यसङ्घः ।
स्वैराचारान् सेवमानो मनुष्यः कश्चिद्धर्मं साधनं स्वं विधत्ते ॥

नव्यं रूपं बिभ्रता सौगतेन मार्गेणायं स्वार्थमीप्सुर्नवीनः ।
नेपालीयः शासकः सौगतस्य प्राच्यं धर्मं नव्यरूपं विधित्सोः ॥

भिक्षोः सख्यं लब्धुमिच्छुस्तदीयप्रीत्यै किञ्चिद् द्रव्यजातं विनीय ।
पाश्चात्यानां वाचमासेवमानः किञ्चिच् शिष्टं कीकसं सत्करोति ॥

२००८।७।२०

विद्यां हित्वा वावदूकत्वमाप्तानुग्रं भावं वाग्भिरेवोपन्नान् ।
छात्रानाप्तान् भाषणैः कर्तुकामा नेतृत्वं स्वं कुर्वते रूढमूलम् ॥

एवं कृत्वा धूर्ततां स्वां निगूह्य राणाद्वेषी सौख्यमीप्सुर्नवीनः ।
नेपालीयः शासकः स्वं प्रभावं नेपालेऽस्मिन् ख्यातिमाप्तं चकार ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

किञ्चित् कार्यं संविधातुं न शक्ते राणानीत्या प्राज्यरिक्थं जिहीर्षौ ।
बाह्यं कञ्चिच् श्रद्धया वीक्षमाणे नव्ये लोकः शासके नैव तस्थे ॥

पूर्वं राणाद्वेषिणो ये बभूवुर्मर्त्यास्तेऽमी शासकेऽस्मिन् नवीने ।
भूयो द्वेषं वर्धयन्तः स्ववृत्तिं त्रातां कर्तुं चेष्टमाना विभान्ति ॥

सख्यं तेषामाप्य भूयोऽपि शिष्या विद्यां हित्वा नेतृतामाचरन्तः ।
दण्डं नव्याच् शासकादाप्य भूमिं रक्तैः स्वीयै रक्तभावं नयन्ति ॥

२००८।७।२१।४

राणाग्रणीर्मोहनो यां मर्यादामकरोत् पुरा ।
स्वस्याः शक्ते रक्षणाय प्रजाशक्तिनिरोधिकाम् ॥

यामेव भङ्क्तुमनसः कोइरालादयः पुनः ।
कष्टं कारागेहवासं मोहनादेशजं ययुः ॥

स्वस्मिन् हस्त आप्तवत्यां शक्तौ तस्याः स्थिरीकृतौ ।
गृहमन्त्री कोइरालास्तयैव मोहनायते ॥

प्रजानां चित्तजं भावं निरोद्धुं कृतसाहसाम् ।
तां मर्यादां नाशयितुमुद्यताः सन्ति केचन ॥

एवं कष्टो हि संघर्षः प्रजाभिः सह मन्त्रिजः ।
नेपालं क्षुभितं कुर्वन् वर्तते नः समक्षतः ॥

अस्मिन्नेव च संघर्षे कोइरालाकुधुङ्गवः ।
वह्निरेकं च तरुणं छात्रं भस्ममयं व्यधात् ॥

सर्वानपि जनांस्तस्मिन् संघर्षे क्षतशालिनः ।
कोइरालाद्वेषभाजः स्नेहदृष्ट्या व्यलोकयन् ॥

औषधागारशयनं शहदीनं व्रणाङ्कितम् ।
सौखशायनिको भूत्वा मोहनोऽगात् स्वयं पुनः ॥

एवं दृष्ट्वा चलच्चित्तं चञ्चलां च परिस्थितिम् ।
न नमेत् कः सुधीमानी कौटल्यं मार्गदर्शकम् ॥

२००८।७।२४

CC-0. Nepal Sanskrit Academy, Kathmandu

विद्यार्थिनः स्वैः प्रलापैरुन्मत्तानिव कुर्वता ।
नेतृब्रुवेण लोकेन पूर्वं स्वार्थो व्यधीयत ॥

विद्याविमुखतामाप्तान् स्वैरमाचरतोऽनिशम् ।
वाक्पारुष्याप्तयशसश्छात्रान् स्तुत्या नियोजयन् ॥

नेतृब्रुवो जनपदं निजं मूर्खत्वभाजनम् ।
विधाय राज्यं सकलमात्मसात् कर्तुमिच्छति ॥

नो चेत् कथङ्कारमहो राणानां शासनस्थितौ ।
छात्राणां स्वैरमाचारं प्रशंसन् नायकब्रुवः ॥

संप्राप्तराज्याधिकृतिश्छात्राननपिधायकः ।
अधुना भाषणपरान् सर्वांश्छात्राञ्जिघृक्षति ॥

बालकस्य च शिष्यस्य शोणितेन धरातलम् ।
रक्तं कुर्वन् विरक्तत्वं लोकानां च जुघुक्षति ॥

२००८।७।२५।१

अधुना विषमा परिस्थितिर्जगदेतद्भृशमेव पीडितम् ।
तनुते स्मृतिलोपमीयुषां न नृणां क्वापि च सुस्थिता गतिः ॥

वचनं परकीयमाश्रितो महिमानं परमाप्तुमुत्सुकः ।
बहुलः कलहोत्सुको जनो लपनैरेव जगज्जिगीषति ॥

२००८।७।२६।२

विश्वेश्वरस्य हननाय समुद्यतोऽयं गोर्खादलाग्रसरतां प्रथितां दधानः ।
राणान्वयो भरतनामक एष इत्थं वाचं जनेषु बहुलेष्वकिरन् नवीनः ॥

नेपालशासकगणोऽधिगतोच्चमानः पूर्वं क्रमेण गलिते विभवे स्वकीये ।
कुर्वन् स्वकीयपदहानमहो इदानीं मुञ्चंस्तमेव भरतं श्वसितं विधत्ते ॥

२००८।७।२७।३

कृष्यादिभिः कर्मभिरात्मगेहजां विधाय वृत्तिं सुखमेव तस्थुषाम् ।
अस्माकमस्मिन् विषयेऽपि साम्प्रतं न वीक्ष्यते क्वापि च सुस्थिता गतिः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

दारिद्र्यवेगेन समन्ततो धरां विचिन्वता लोभजयित्वमीप्सताम् ।
यूरोपजानां करगे च भारते तद्वृत्तिसाङ्कर्यमभूत् पदे पदे ॥

विदेशजैर्वस्तुभिरापणा इमे सुपूरिता भान्ति जनाक्षिनन्दनाः ।
दारिद्र्यदावानलदग्धमानसाः पदे पदे सन्ति जना अनिर्वृताः ॥

न लभ्यते किञ्चन वृत्तिसाधनं वृत्तेर्विलोपान्मनुजैरितस्ततः ।
दन्दह्यते लोकमियं परिस्थितिर्बुभुक्षितः कुत्र शमं परीप्सति ॥

प्राचीनविद्या लयमैच् शनैः शनैर्नवीनविद्या न च सुस्थिताऽभवत् ।
महर्घतामाश्रितया नवीनया न शिक्षया मर्त्यगणोऽप्ययुज्यत ॥

वृत्तेर्विनाशात्कृशतां गतो धने विद्याविनाशाच्च धियापि वर्जितः ।
पदे पदे जीवनहेतवे जनः प्राप्नोति कष्टां विषमां परिस्थितिम् ॥

अतो हि नेतृब्रुवतां समाश्रिता वाग्मित्वमाप्ताः कति धूर्तमानवाः ।
प्रलभ्य लोकं बहुलं क्षुधाकुलं स्वनेतृतां रक्षितुमीशते सुखम् ॥

२००८।७।२९

आङ्ग्लानां सखितामुपेत्य नृपतिम्मन्यत्वमासेदुषां
राणानां कुलजो मदोत्कटमनाः श्रीमोहनः प्राकृत ।
अन्याय्येन पथा यथा नरपतिं तद्वत्पुनर्भूपतिः
स्थित्वा भारतवीक्षणे प्रकुरुते चन्द्रात्मजान् संप्रति ॥

२००८।८।१६

राणानां विनिपातनेन महितां ख्यातिं लषन् भावुक
ऐश्वर्यं सुखितामभीप्सुरलसो नेतृब्रुवानाश्रितः ।
क्ष्मापालः स्वहितं विवेक्तुमपि नो प्रज्ञापराधात्क्षमो
लोकानां हितसाधनं कथमहो कुर्याद्वराकोऽधुना ॥

पाश्चात्त्यैः प्रथितान् विलासविषयान् दीव्यन्नदृष्टक्रियः
प्राचीनेन नवेन वापि नृपतिज्ञानेन दूरोज्झितः ।
धूर्तैर्नायकमानिभिः कुचरितैः सर्वात्मना वञ्चितो
भूपालो जनताहितं कथमहो कुर्याद्वराकोऽधुना ॥

२००८।८।२

CC-0. Nepal Sanskrit Academy, Kathmandu

अधुना मनुजा इतस्ततो निजनेतृत्वदृढत्वमीप्सवः ।
प्रतियोजितधूर्तभावना जगदेतत् क्षयमानयन्त्यहो ॥

जनपीडनमेव सन्ततं गणयन् नीतिसृतेः पराङ्मुखः ।
अनधीतनिजस्थितिः खलः सकलः शासकतां समीप्सति ॥

जननायकमानिचेतसो वचनैरेव जगज्जिगीषतः ।
अबुधस्य जनस्य सङ्गमात् विकलत्वं नरलोक ऋच्छति ॥

अथवा समयोचितां गतिं स्वहितं चैव न वीक्षितुं क्षमः ।
नृपतिर्निजबुद्धिदोषतो जनतां स्वं च समं जिघांसति ॥

२००८।८।३

अहो अहिंसा

नवीनैः स्वैर्मन्त्रिभिः सहितो महाराजाधिराजो नवीनेन प्रस्थानेन सञ्चरिष्णूनां बौद्धभिक्षूणां प्रीतये किमपि कर्तुकामोऽस्तीति वृत्तपत्रात्पूर्वं मयाधिगतमासीत् । ततस्तथागतस्य प्रधानशिष्यतामधिगतयोः शारिपुत्र-मौद्गलायनयोरस्थीनि नेपालमानाययति विमानेन ससचिवो महाराजाधिराजोऽधिकपञ्चदशैश्च दिनैस्तयोरस्थ्नो-र्नेपालोपत्यकायां स्थाने स्थाने प्रदर्शनं पूजादिकं चापि भवतीति वृत्तपत्रादेवावाबुध्ये ।

इतो वर्षाणां शतेन पूर्वं मध्यभारते साँचीस्तूपे समुपलब्धे इमे अस्थिखण्डे आसन्नशतानि वर्षाणि लण्डने प्राचीनवस्तुसङ्ग्रहागारमध्यास्याधुना भारते वम्भ्रम्येते इति च मया पूर्वमेव भारतीयवृत्तपत्रादधिगतमासीत् । प्रतिदिनमितिहासं पठितुर्मम मनसि तथागतो महनीयां स्थितिं बिभर्त्ति । यथाशक्ति च मया केचिद् बौद्धग्रन्था अप्यवालोक्यन्त । तथागतेन स्वयमाचरितेन पथा सञ्चरितुकामो विरागमाप्तो जनो नियतमेव स्वस्मिन् मानसे निर्वृत्तिमाप्नुयादिति च दृढं विश्वसिमि । अहं च बौद्धं धर्मं मोक्षप्रधानं मन्ये मुमुक्षोरेव सिद्धार्थस्य देशिकत्वात् । भारते लब्धप्रशमनाय समुद्यतस्याङ्ग्लराज्यस्य सत्रिभिः प्रयुक्ताः पुरातत्त्वविषयका बहवो विषया मम मानसे प्रतिक्षणं नरीनृत्यन्ते । तेष्वेव विषयेष्वेकोऽयमपि विषयस्तेषां बौद्धधर्मानुराग इति मम मनसि प्रतिभाति । षाड्गुण्यग्रस्तमानसानां सत्यदयार्जवादिभ्यो दवीयस्तया वर्तमानानां तेषां समाधिनासाद्यं परमगहनं तत्त्वं स्वरूपं दर्शयेदिति वक्तुं तु सङ्कुचति मे च जिह्वा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अत एव पूर्वमेवाधिगतवृत्तान्ततया तयोरस्थ्नोर्ज्ञातचरतया चैकादश्यामपि मांसाशिनो महाराजाधिराजस्याहिंसादिव्रतस्य, प्रत्यक्षतया च परःशतान्पुरुषान्निहन्तुर्विश्वेश्वरस्य महाराजाधिराजविश्वेश्वराभ्यां प्रवर्तितेऽस्मिन्नस्थिदर्शनमहोत्सवे नासीत् काचिन्मम महती प्रीतिः ।

कार्तिकमासस्य विंशे दिवसे महतोत्सवेनास्थिकरण्डकं गृह्णन् महाराजाधिराजष्टुण्डिखेले मया दृष्ट आसीत् । परं तत्रैवाहमहमिकया धूमशकटीमध्यासितानां भिक्षूणां दर्शनेन कृतार्थतामिवागच्छत् तद्विषयका मदीया जिज्ञासा ।

ततः परं तद्विषयके व्याख्यानादिप्रपञ्चे यात्रासमाजे च लघ्वीमपि भावनां नाहमकरवम् ।

अद्य प्रातः स्वगृहसमीपवर्त्तिनि काठेसिम्भूनामके विहारे तयोरस्थ्नोर्वर्तमानतयाऽचैव तयोर्बिमानेन भारत गन्तृतयाऽऽत्मनश्चेतिहासरसिकतया दिदृक्षुरहं तत्रागमम् । तत्र च परितो वह्न्यस्त्रपाणिभिर्मुक्तिसैनिकैः परिवृतं लघुनि मण्डपे पीताम्बराभ्यां भक्तेभ्यः पुष्पं ददद्भ्यां पूजां गृह्णद्भ्यां भिक्षुभ्यां पुरःस्थापितमस्थिकरण्डकचैत्य विलोकयतो मम मनसि सहसा प्रादुरभवद्विचारः किमियमेवाहिंसेति ।

यदि नाम वह्न्यस्त्रपाणयः परःसहस्रमनुजघातका रक्षादलपरनामका इमे मुक्तिसैनिका (कांग्रेसानुचरा भटाः) न स्युस्तर्हि राज्यं शस्त्रं धनं गेहं च विहाय प्रव्रजितस्य ध्यानमहिम्नाधिगतबुद्धत्वस्य तथागतस्य महिमापि न स्यादिति स्फुटीभवत्येतत्कृत्यदर्शनात् ।

अतः प्रकरणप्राप्तं किञ्चिच्चिन्त्यते –

अस्माकं राणाशासकाः सदैव स्वां स्थितिं द्रढयितुकामा आसन् । ते हि सर्वेभ्योऽपि वस्तुभ्योऽधिकारं धनं च महीयो मन्यमानानां सांसारिकाणां पुरुषाणां समानधर्माण आसन्निति ते गर्हणीयतामपि न भजन्ति लौकिकदृष्ट्या ।

अत एव ते नवीनस्य कस्यापि विचारस्य प्रवर्तनं स्वदेशे मा भूदिति निरन्तरमचिन्तयन् । नवीनविचारधाराऽपि तेभ्यो नारोचत । परं ते सनातनेन पथैव गन्तुकामा आसन् । तेषां सनातनो धर्मो नाम प्राचीनो धर्मो नासीत् । किन्तु भारतेशस्य दासत्वमपि स्वीकृत्येव महाराजाधिराजं प्रजाश्च समं निगृह्य स्वाधिकाररक्षणमेव तेषां सनातनो धर्म आसीत् । अत एव ते प्राचीनस्यापि कस्यापि प्रस्थानस्योद्धाराय नायतन्त । यथाकथञ्चिद्वर्तमानेन पथा सञ्चरणमेव तेषामभीष्टमासीत् ।

भारत आङ्ग्लानां प्रभुतायां व्यश्नुवानायां तद्विरोधं स्फुटं कर्तुमशक्नुवन्तो धर्मापदेशेन केचन मनुष्याः प्रजासु बहुविधान् तर्कान् व्यवस्थापयामासुः । तेषु केचन देशहितकामा बभूवुः । केचन स्वार्थदग्धहृदया अपि बभूवुः । भवतु चैतद् विषयान्तरम् ।

एवं धर्मापदेशेन भारते समागतां काञ्चिल्लघ्वीमेव जागर्तिं वीक्ष्य शङ्किता राणाशासका नवीनस्य धर्मप्रस्थानस्य स्वदेशे प्रवेशं न्यषेधन् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

आङ्ग्लसचिविभिरेव प्रदर्शितेन पथा सञ्चरमाणाः केचन जना भारते बौद्धधर्मापदेशेन नवीनां काममपि संन्यासपद्धतिमाकलय्य स्वां स्थितिं महनीयां चक्रुः । एतादृशेषु मनुजेषु केचन आङ्ग्ला नरः शत्रुतामुपेत्य गान्ध्यादीनामनुयायितामपि जग्मुः ।

एवं नवीने भिक्षुप्रस्थाने भारते जाग्रति नेपालेऽपि केचन वौद्धधर्मापदेशेन नवीनां पद्धतिं प्रसारयितुमैच्छन् । ते च सहसैव राणाशासकैर्न्यषिध्यन्त । अत एव ते तदनुगामिनश्च स्वभावत एव कृत्यपक्षतामगृह्णन् ।

सममेव स्वैराचारं कुर्वन्तो महाराजाधिराजो राणाशासका नेतृब्रुवाश्चापि स्वार्थभेदेनेदानीं द्विधा विभक्ता दृश्यन्ते । प्रजातन्त्रापदेशेन महाराजाधिराजस्य तदनुगामिनां नेतृब्रुवाणां च व्यश्नुवाने प्रतापे तेषां प्रत्यक्षं स्वैराचरणं वीक्ष्य विरक्ता भवेयुः प्रजा इति बुद्धया राणाशासकानुयायिभिर्धर्मसङ्घो व्यवास्थाप्यत ।

राणाशासकानां प्रिया यथेच्छं विहरन्तो धनायन्त एव तेषां नेतृतामगृह्णन् । यदीयः कीर्तिस्तम्भश्च श्रीपशुपतेरन्तिकं वनकालीप्रदेशमलङ्करोति ।

एवं धर्मानुरक्ताः प्रजा विरक्ततां भजेयुरिति स्वं स्वैराचारं धर्ममिति ख्यापयितुकामाः समहाराजाधिराजा नेतृब्रुवाः राणाकृत्यपक्षतां श्रितानां सुखमीप्सूनां भिक्षुकम्मन्यानां तदनुगामिनां च प्रीतयेऽभवन्निति ।

वह्न्यस्त्रपाणिभिर्मुक्तिसैनिकैः परिवृतमितिहासवस्तुभूतमस्थिमात्रं वीक्ष्यान्यथा को वा धीमान् महाराजाधिराजस्य नेतृब्रुवाणां च मुखेभ्योऽहिंसामाहात्म्यं श्रुत्वा तत्र प्रत्ययं दधीत ।

धर्मापदेशेन जनान् प्रतार्य स्वार्थं विधातुं बहवो मनुष्याः ।
चरन्ति तेषां चरितं विवक्षुं कौटिल्यधीरं न नमेन्नरः कः ॥

२००८।८।७५

दासत्वमेव मनसा प्रथमं गतानां सद्वस्तुवीक्षणपरप्रतिभाच्युतानाम् ।
नानाविधं सुखचयं लषतां जनानां संदृश्यतां चरितमत्र किमाकृतीदम् ॥

स्वैः बान्धवैः सह विरुध्य परस्य दास्यं स्वीकृत्य वंशजनितां गुरुतां स्वकीयाम् ।
नीचैर्निपात्य कनकं लषतां जनानां सन्दृश्यतां चरितमत्र किमाकृतीदम् ॥

विद्याविहीनमनसां विटवेष्टितानां दीनान् निपीड्य सदनं भरताममीषाम् ।
संमार्जनीर्निजकरे दधतां कुलस्य द्वेषाच्चरित्रमिदमेति किमाकृतित्वम् ॥

२००८।८।८

CC-0. Nepal Sanskrit Academy, Kathmandu

राणान्वयस्य पदमाश्रयतां नराणां बाहुल्यमेव नवशासकसिद्धिरस्ति ।
राणान्ववायगतकोपमनोदशेभ्यः पुंभ्यो हि बिभ्रति भयं नवशासकाश्च ॥

दासानुदासपदवीधृतमानसानां पुंसां महास्थिततया हतधीर्वराकः ।
पूर्वो हि शासकगणो न विवेद मृत्युं व्यादाय वक्त्रमखिलं स्वपुरोऽवतीर्णम् ॥

तद्वत् तथाविधनरैः कृतपादपूजः साफल्यमाप्य धृतगर्वभरः प्रमत्तः ।
स्वां संविदं च विजहत् कतिभिर्हि घस्रैर्गन्ता स्वपूर्वजगतिं नवशासकोऽयम् ॥

२००८।८।९।७

साम्प्रतं परबलेन विवत्सोः स्वं हितं स्वयमहो न विधित्सोः ।
राजनीतिविमुखस्य जनस्य दृश्यतेऽत्र नगरेषु चरित्रम् ॥

स्वे हिते परिचयं न विधाय स्वं सुखं द्रुतमवाप्तुमधीरः ।
किं करोत्यलसधीरिति चित्रं दृश्यतेऽत्र नगरेषु चरित्रम् ॥

भाषणैर्जगदिदं विजिगीषुः सम्मुखं च समरं विजिहासुः ।
कातरत्वमपि शान्तिपदेन वक्तुमिच्छति जनो वकवेषः ॥

२००८।८।१०।१

बाह्याश्रयात् स्वनृपतिं ह्यवमन्यमानाश्चन्द्रात्मजा भरतवर्षजदास्यमेत्य ।
स्वं गौरवं जनपदं च निपातयन्तः कर्तव्यबोधविधुरा न लसन्ति दीनाः ॥
दीनाः प्रजाः परिनिपीडय सुखं वसन्तः शस्त्रक्रियासु विमुखा नयनैपुणे च ।
किंशासकाः कतमया प्रलयं कुरीत्या यान्तीति दर्शनमिमे ननु चन्द्रपुत्राः ॥

२००८।८।११।२

श्रीकेसरो जनहिताय कदापि किञ्चिच्चक्रे पुरेति कथनं तु वयं न विद्मः ।
दारान् सुतांश्च सममेव निगृह्य कामाचारत्वमेव विदधे स इति स्फुटं नः ॥
एवंविधोऽपि स जनः पुनरत्र राज्यं राणाकुले जहति शत्रुगणैः प्रयुक्ते ।
सत्याश्रिते शुभविधौ पठनैकसाध्ये द्रव्यं ददाति बहुलं तृणवत् प्रहृष्टः ॥
राणाकुलस्य यशसैव हि वंशजानां मन्त्राधिकारविधुरेऽपि च मन्त्रिवर्गे ।
स्थानं महत् स लभते रिपुहस्तदत्तं चैतन्निरीक्ष्य किमु ना हृदये दधीत ॥

२००८।८।१२।३

CC-0. Nepal Sanskrit Academy, Kathmandu

आडम्बरेण सुकृतित्वमुपाश्रितस्य विद्वद्भुवस्य मनुजस्य सहत्वमाप्तः ।
लोको न काम्चन गतिं स्वहितां च विद्वान् नेतृब्रुवस्य सकलस्य मुदे बभूव ॥

लालाटिकान् करुणया स्वदृशानुगृह्य लोकं समस्तमपि मुग्धमतिं विधित्सोः ।
राणाकुलस्य पदगो मनुजोऽतिभीरुर्नेतृब्रुवस्य सकलस्य मुदे बभूव ॥

राणावंश्याः पैतृकं रिक्थमेव नेपालस्थं मेनिरे राज्यमेतत् ।
तेषां दृष्टौ मानवाः सर्ववर्णा दास्यं कर्तुं ब्रह्मणाऽसन् विसृष्टाः ॥

राज्यं हस्ते स्वे दृढं कर्तुकामाः केचिद् धूर्ताश्चन्द्रमुख्याश्च तेषु ।
दायादान् स्वान् दूरतः संविधातुं दासीपुत्रान् स्वाधिकारान्निरासुः ॥

बुद्ध्या हीनाः क्रोधवेगेन युक्ता दासीपुत्रा गङ्गदत्तायमानाः ।
कांश्चिद् धूर्तान् मानवान् मस्तके स्वे धृत्वा वेषान् बिभ्रते नैकरूपान् ॥

२००८।८।१५।६

मृतिमुपेतवतीं प्रतनस्थितिं पिशितपूर्णतनूमिव मानुषीम् ।
जनपदेऽत्र विलोक्य जिघत्सया द्रवति नायकगृध्र इतस्ततः ॥

बहलपक्षविधूननजै रवैर्जनमनो भयसङ्कुलतां नयन् ।
सदृशपक्षगणाद् भयमाप्नुवद् द्रवति नायकगृध्र इतस्ततः ॥

पिशितपूर्णमुखान् निजबान्धवान् खरतरैर्नखरैः प्रविदारयन् ।
उदरपूर्तिविधानपरायणो द्रवति नायकगृध्र इतस्ततः ॥

२००८।८।१९।३

जनशासनवादिनो जनाः प्रभुतां भारतजां स्वहस्तगाम् ।
प्रतिपद्य समं हि राजकं व्यदधुर्नायकपादमाश्रितम् ॥

निजशासनरक्षणोद्यतान् नरपालान् जनराज्यवादिनः ।
स्वनयेन विधाय दुर्बलान् स्वहितं स्वं च यशो व्यसारयन् ॥

अस्मिन् कार्ये भारतीये विरोधमुग्रं कृत्वा हैदराबादभूपः ।
स्वीयां सत्तां रक्षितुं साग्रहः सन् चित्तोद्वेगं भारतीयं चकार ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अस्मद्देशे लब्धमूलो धनाढ्यो राणावंशो हैदराबादभाजः ।
राज्ञस्तुल्यो द्रव्यनीत्या बभूव तुल्यावास्तां तौ रिपू भारतस्य ॥

अस्मिन् काले रक्षणीयं स्वहेतो राणावंशो हैदराबादभूपम् ।
उद्धर्तुं स्वां वाहिनीं भारताय यच्छन् प्रीतिं भारतीयामियेष ॥

तस्मिन् भूपे हैदराबादसंस्थे दण्डं लब्ध्वा कृत्तपक्षत्वमाप्ते ।
राज्ञां सत्तां रक्षितुं भारतेऽत्र शक्तो योद्धा नैव कश्चिद्बभूव ॥

एवं शक्तिं स्वां दृढां संविधाय लब्धख्यातिर्नेहरुर्भारतीयः ।
अन्तःकोपं स्वीयनीत्या विधाय नेपालेऽपि स्वं पदं कर्तुमैच्छत् ॥

तस्मिन् कार्ये गङ्गदत्तायमानाः केचिद्राणा मन्त्रणां भारतस्य ।
लाभं लाभं नायकम्मन्यतायाः पात्रीभूताः स्वार्थसिद्धिं समीयुः ॥

केचिद् धूर्ता नेतृरूपं धरन्तो राणाद्वेषं सर्वतः संप्रसार्य ।
स्वीयं स्वार्थं कर्तुमत्रैव काले व्याख्यानानां वर्षणान्येव चक्रुः ॥

राणावंश्यैः पीडितोऽत्यन्तमेव द्रव्यं लिप्सुः सौख्यकामो नरेशः ।
अस्मिञ्जाले भारतीये प्रपद्य राणाहस्तान्मोचनं स्वं ववाञ्छ ॥

राणावंशश्चैव नाशं जगाम राज्ञां सत्ता चैव लीनत्वमाप ।
सर्वा नीतिर्भारतीयत्वमाप्ता कौटल्यार्थश्चैव दृष्टो मयापि ॥

२००८।८।२०

(शेषमन्येष्वङ्केषु)

नेपालराजधान्यां बौद्धानां समागमः*

वह्निक्ष्मागगनाक्षिभिः २०१३ परिमिते संवत्सरे वैक्रमे
मासे कार्तिकसंज्ञके गुरुदिने त्रिंशे दिने सौरतः ।
सक्तानां सुगतायने नवतना आङ्ग्लीं गिरं प्रापिते
भिक्षूणां भवति स्म कान्तिनगरे नेपालजे संगमः ॥ १ ॥

– सम्पादकौ

* रामजीतेवारिणो हस्तलिपौ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

बर्मासिंहलभोट्टचीनमलयाजापानदेशादिषु
बुद्धस्य प्रतिमाधुनाऽपि मनुजैः श्रद्धान्वितैरर्च्यते ।
नेपाले सुगतालयेषु बहवस्तस्यार्हणां कुर्वते
श्रीविष्णोर्नवमोऽवतार इति यः पौराणिकैः कथ्यते ॥ २ ॥

तुर्कैर्मुस्लिमतां गतैर्भरतभूखण्डं स्वखड्गाश्रयात्
कुर्वद्भिः स्ववशं सुपर्वभवनद्रव्यं हठाल्लिप्सुभिः ।
शान्ता बौद्धमठाः सुवर्णमहिता ग्रासाः स्वकीयाः कृता
भूटानं सुखिमं विना ससमयो लुप्तोऽभवद् भारते ॥ ३ ॥

षड्भिर्वर्षशतैस्तुरुष्कमुगलैरात्ते हठाद् भारते
लुप्तं बुद्धपथं सितास्यविभुभिः संचोदिताः सत्रिणः ।
भग्नानां दृषदां निदर्श्य निचयं प्रत्नाख्ययोत्प्रेक्षणै-
र्नव्याङ्गं व्यदधुः शतेन शरदामाङ्ग्लप्रमाणाश्रयम् ॥ ४ ॥

आङ्ग्लानां नवशिक्षणे भरतभूखण्डोद्भवा मानवा
हीनाः शस्त्रबलेन शिल्परहिता वाचोऽभवन् स्वामिनः ।
आङ्ग्लं शिक्षणमाप्तवान् नववया गान्धी लषञ्जीविका-
मफ्रीकां प्रतिपद्य गौरवदनैरुद्वेदितोऽभूद् भृशम् ॥ ५ ॥

गौरास्यैः सुतरां कठोरहृदयैः संवेष्टितः सर्वतो
गान्धी किञ्चन साधनं नहि तदा लेभे तितिक्षां विना ।
अन्तः षड्गुणितां बहिश्च शमितामाप्ता जना गान्धिका
रूसास्त्रात् समताप्रवादमहितादाङ्ग्ला न रक्षन्निव ॥ ६ ॥

युद्धे जर्मनमूलके क्षतबलस्त्रस्तो भृशं रूसतः
साम्राज्यं परिरक्षितुं च न महच्छक्तो बृटेनाधिपः ।
कोशाच्छस्त्रबलाच्च लब्धयशसो न्यूयार्कनेतुर्वचः
श्रुत्वा दुःखितमानसो भरतभूखण्डादिकानत्यजत् ॥ ७ ॥

आसन्नाहितलक्षणा भरतभूखण्डे जना गान्धिका-
स्तेऽकुर्वन् महनीयशासकपदान्याङ्ग्लोज्झितान्यात्मसात् ।
हीनाः शस्त्रबलेन शिल्परहिताः षाड्गुण्यसक्ता अमी
त्रातुं स्वां पदवीं वदन्ति वहुधा लोके कथां शान्तये ॥ ८ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

पूर्णिमा (इतिहास-प्रधान त्रैमासिक पत्रिका) का.मे.अ.द.नं. १५५ · २४९

कार्यालय

संशोधन-मण्डल

एकान्तकुना, जावलाखेल

ललितपुर

नेपाल

फोन नं. ५-५२४८१९, ५-५३२७४९

पो.ब.नं. ४१६६, काठमाडौँ

वि.सं. २०६० कार्तिक

यस अङ्कको मूल्य रु. ७०/-

मुद्रक :
पूर्णिमा प्रेस, यट्खा, ढोकाटोल, फोन नं.: ४२५९८७७